# तृतीयः पाठः

## भीमाष्टकम्

**डॉ. श्रीधरभास्करवर्णेकरः**

### परिचयः

भारतरत्नस्य डॉ. भीमराव–अम्बेड़करमहोदयस्य प्रेरणास्पदं जीवनवृत्तम् आश्रित्य कविप्रज्ञाभारती डॉ. श्रीधरभास्करवर्णेकरमहोदयेन ''भीमाष्टकम्'' इति विरचितम्। एतदेव 'भीमाष्टकम्' अस्मिन् पुस्तके पाठरूपेण प्रस्तुतम् अस्ति। 'भीमाष्टकम्' इति नाम्ना एव अस्य पाठस्य विषयवस्तुनः ज्ञानं सुस्पष्टं जायते। 'भीम' इतिपदेन डॉ0 अम्बेडकरमहोदयस्य नाम, अष्टकपदेन च अष्टसंख्यकानां श्लोकानां सङ्केतः अधिगृह्यते। अस्पृश्यकुले जन्म सम्प्राप्य सर्वथा प्रतिकूलपरिस्थितौ अपि एष महानुभावः विशिष्टं यशः अलभत, तेनैव यशःप्रभावेण दलितजनानाम् उद्धारम्, अशिक्षितजनेषु शिक्षाप्रचारं, दीनहीनानां जनानां च जीवनपरिष्कारम् अकरोत्। एतादृशस्य पुण्यकर्मनिर्वाहकस्य महापुरुषस्य जीवनवृत्तम् एतस्मिन् भीमाष्टके मङ्गलस्वरूपतया नमोवचनपूर्वकं प्रस्तुतमस्ति।

अस्य भीमाष्टकस्य रचयिता डॉ0 श्रीधरभास्करवर्णेकरमहोदयः संस्कृतसाहित्यजगति सुविख्यातः वर्तते। अयं कविः नागपुरस्य पुण्यभूमौ जन्म अलभत। श्रीमतः वर्णेकरमहोदयस्य गणना महाकवीनां समूहे भवति। अनेन महाकविना सुविपुला सारस्वतसाधना सुरभारतीसेवा च विहिता। अनेन विरचितकाव्यानां नामानि एतानि सन्ति –

1. शिवराज्योदयम् – षट्षष्टिसर्गात्मकं महाकाव्यम्।
2. विभूतिवन्दनम् – खण्डकाव्यम्।
3. जवाहरतरङ्गिणी – खण्डकाव्यम्।
4. विनायकवैजयन्ती – खण्डकाव्यम्।
5. रामकृष्णपरमहंसीयम् – खण्डकाव्यम्।
6. विवेकानन्दविजयम् – नाटकम्।
7. शिवराज्योदयम् – नाटकम्।

एतदतिरिच्य श्रीमता वर्णेकरमहोदयेन बहूनि स्तोत्राणि विरचितानि।

## भीमाष्टकम् –

**जन्मास्पृश्यकुले विपत्तिविकले नानानिषेधाकुले,**
**विद्यामन्दिरसम्प्रवेशनविधौ लोके विरोधो महान्।**
**नो धर्माचरणे मनागनुमतिर्नो संस्कृतिप्रेरणा,**
**प्राप्तो येन तथाऽप्युदग्रमहिमा भीमाय तस्मै नमः।। 1 ।।**

**पदच्छेदः** – जन्म अस्पृश्यकुले विपत्तिविकले नानानिषेधाकुले, विद्यामन्दिरसम्प्रवेशन–विधौ लोके विरोधः महान्। नो धर्माचरणे मनाग् अनुमतिः नो संस्कृतिप्रेरणा, प्राप्तः येन तथा अपि–उदग्र–महिमा भीमाय तस्मै नमः।

**अन्वयः** – यस्य नानानिषेधाकुले विपत्तिविकले अस्पृश्यकुले जन्म, विद्यामन्दिरसम्प्रवेशन– विधौ लोके महान् विरोधः। धर्माचरणे मनाक् अनुमतिः नो, संस्कृतिप्रेरणा नो, तथापि येन उदग्रमहिमा प्राप्तः तस्मै भीमाय नमः।

**प्रसङ्गः** – अस्मिन् पद्ये कविः डॉ. भीमराव–अम्बेडकरस्य प्रभावातिशयस्य वर्णनं करोति।

**व्याख्या** – यस्य – यस्य भीमराव–अम्बेडकरस्य। नानानिषेधाकुले – विविधप्रतिबन्ध– व्याकुले। विपत्तिकाले – आपद्ग्रस्तसमये। अस्पृश्यकुले – निम्नवंशे। जन्म–जननम्, उत्पत्तिः। (अभवत्)। विद्यामन्दिरसम्प्रवेशनविधौ – विद्यालयप्रवेशविषये। लोके–जगति, संसारे। महान् – भूयान्, अत्यधिकः। विरोधः – प्रतिरोधः। धर्माचरणे – धर्मस्य परिपालने, धर्मकृत्यनिर्वाहे। नो–नैव, नहि। मनाक् – किञ्चिदपि, ईषदपि। अनुमतिः – स्वीकृतिः, अनुज्ञा। नो–नैव, नहि। संस्कृतिप्रेरणा – भारतीयसंस्कृतिविषये समुपदेशना। तथापि – पुनरपि, तदनन्तरमपि। येन – वर्ण्यमानेन (भीमरावअम्बेडकरमहोदयेन) उदग्रमहिमा – विशालगौरवम् – प्रचण्डप्रभावः। प्राप्तः – अधिगतः, लब्धः। तस्मै – तादृशाय। भीमाय– डॉ0 भीमराव–अम्बेडकराय। नमः– प्रणामः, नमस्कारः, इति।

**भावार्थः** – यस्य भीमराव–अम्बेडकरस्य जन्म अनेकविधप्रतिबन्धिते अभावग्रस्तसमये निम्नकुले जातम्, तस्य इह लोके प्रचुरः विरोधः सञ्जातः। धर्माचरणस्य स्वीकृतिं स च नैव प्राप्तवान्। तथापि लोके स्वविवेकपूर्णव्यवहारेण तेन लोके महती प्रतिष्ठा प्राप्ता। अत एव विविधविरोधपरिवेशेऽपि यः प्रखरप्रभावं प्रकटितवान् तस्मै महापुरुषाय नमः इति।

**व्याकरणम्** – अस्पृश्यकुले – अस्पृश्यस्य कुलम् – अस्पृश्यकुलम् तस्मिन् अस्पृश्यकुले। विद्यामन्दिरसम्प्रवेशनविधौ – विद्यायाः मन्दिरं विद्यामन्दिरम्, तस्मिन् सम्प्रवेशनविधिः इति विद्यामन्दिरसम्प्रवेशनविधिः – तस्मिन् (षष्ठीतत्पुरुषः, सप्तमीतत्पुरुषः)। धर्माचरणे – धर्मस्य आचरणम् इति धर्माचरणम्, तस्मिन् (षष्ठीतत्पुरुषः)। प्राप्तः – प्र + आप् + क्त + सु। तस्मै तत् + ङे (स्मै) चतुर्थी–एकवचनम्।

निदर्शनम् – नि + दृश् + ल्युट् (यु–अन) + सु। दृढतरम् – दृढ + तरप् (तर) + सु। जीवनम् – जीव् + ल्युट् (यु–अन) + सु। धीरोदात्तनरोत्तमाय – धीर + उदात्त, नर + उत्तमाय – गुणसन्धिः।

**जीवानां बलजन्म दैवनियतं मान्येऽवमान्ये कुले,**
**श्रेष्ठत्वं परमात्मपौरुषपरं लोकेऽत्र निःसंशयम्**

**तत्त्वस्यास्य निदर्शनं दृढतरं यस्योज्ज्वलं जीवनम्**

**धीरोदात्तनरोत्तमाय सततं भीमाय तस्मै नमः ।। 2 ।।**

**पदच्छेदः —** जीवानाम् बलजन्मदैवनियतम् मान्येऽवमान्ये कुले, श्रेष्ठत्वम् परम् आत्मपौरुषपरम् लोके अत्र निःसंशयम्। तत्त्वस्य अस्य निदर्शनम् दृढतरम् यस्य उज्ज्वलम् जीवनम्, धीरोदात्तनरोत्तमाय सततम् भीमाय तस्मै नमः।

**अन्वयः —** जीवानाम् मान्ये अवमान्ये (वा) कुले बलजन्म दैवनियतम् (भवति) परम् अत्र लोके आत्मपौरुषपरम् श्रेष्ठत्वम् निःसंशयम् (भवति इति)। इस्य तत्त्वस्य दृढतरं निदर्शनम् यस्य उज्ज्वलम् जीवनम् (विद्यते इति) तस्मै धीरोदात्तनरोत्तमाय भीमाय नमः।

**प्रसङ्गः —** आस्मिन् पद्ये कविः डॉ. भीमरावस्य जीवनं समाजस्य कृते उदाहरणस्वरूपं वर्तते इति प्रतिपादयन् कथयति यत्—

**व्याख्या —** जीवानाम् – प्राणिनाम्, जन्मधारिणाम् , मान्ये – सम्माननीये, अवमान्ये – अवमाननीये, अनादरणीये, (वा – अथवा), बलजन्म – बलं, शक्तिः वेति, जन्म च – जन्मग्रहणं च , दैवनियतम् – भाग्याधीनम्, भाग्येन निश्चितम् (अस्ति) अर्थात् पूर्वनिर्धारितमस्ति (परम् –किन्तु) अत्र – अस्मिन् जगति, इह लोके वा, श्रेष्ठत्वम् – महिमशालिता, महत्ता, श्रेष्ठता वेति, परमात्मपौरुषपरम् – आत्मनः पौरुषस्य अधीनमस्ति, ईश्वरस्याधीनम् उत्साहशक्त्यधीनं चेति (वर्तते), निःसंशयम् – निःसन्देहम् अस्य – एतस्य (पूर्वोक्तस्य), तत्त्वस्य – वृत्तान्तस्य, दृढतरम् – स्थूलतरम्, निदर्शनम् – दृष्टान्तः, उदाहरणभूतम्, यस्य – व्यक्तिविशेषस्य – डा. भीमराव (अम्बेडकरस्य) उज्ज्वलम् – स्वच्छम्, उन्नतं कीर्तिमयञ्च, जीवनम् – अखिलजीवनव्यवहारः (विद्यते – अस्ति), तस्मै – तादृशाय, भीमाय – डॉ. भीमरावअम्बेडकराय, नमः – नमस्कारः, प्रणामः,

**विशेषः —** अस्मिन् पद्ये '**दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्**' इत्यस्य अभिप्रायस्य प्रतीतिः नूनं जायते। अस्मिन् जगति प्राणिनः सम्माननीये, असम्माननीये च कुले सद् जन्मग्रहणं शक्तिग्रहणं च ईश्वराधीनमस्ति, किन्तु स्वश्रमेण पौरुषप्राप्तिः नूनं स्वाधीनं, मन्यते कथनमेतत् डॉ. भीमराव अम्बेडकरस्य अखिलेऽपि जीवने सर्वतोभावेन अवलोक्यते। एतादृशगुणगणयुक्ताय धीरोदात्तपुरुषाय डॉ. भीमरावमहापुरुषाय कविः प्रणामाञ्जलिं निवेदयति।

**मिथ्याधर्ममताभिमानकृपणैर्देशेऽखिले भारते,**

**अस्पृश्या इति धिक्कृताश्चिरमहो हा मानवैर्मानवाः।**

**शश्वन्निर्दलिता उपेक्षिततमा विद्यार्जने वञ्चिताः,**

**तेऽमी येन समुद्धृताः स्वतपसा भीमाय तस्मै नमः।। 3 ।।**

**पदच्छेदः** — मिथ्या–धर्म–मत–अभिमत–कृपणैः देशे अखिले भारते, अस्पृश्या इति धिक्कृताः चिरम् अहो हा मानवैः मानवाः शश्वत् निर्दलिताः उपेक्षिततमाः विद्या–अर्जने वञ्चिताः ते अमी येन सम् उद्धृताः स्वतपसा भीमाय तस्मै नमः।

**अन्वयः —** अहो हा ! अखिले भारते देशे मिथ्याधर्ममताभिमानकृपणैः मानवैः मानवाः अस्पृश्याः इति' चिरं धिक्कृताः। शश्वत् निर्दलिताः उपेक्षिततमाः विद्यार्जने वञ्चिताः (च) ते अमी (मनुष्याः) येन स्वतपसा समुद्धृताः तस्मै भीमाय नमः।

**प्रसङ्गः**– अस्मिन् पद्ये डॉ0 भीमराव–अम्बेडकरः दीनजनानामुद्धारम् अकरोत् इति कविः वर्णयति।

**व्याख्या** – अहो हा ! – हा हन्त ! अहह ! (खेदे) अखिले – सम्पूर्णे, सकले वा। भारतदेशे – आर्यावर्ते, भारतवर्षे वा। मिथ्याधर्ममताभिमानकृपणैः – व्यर्थधार्मिकतर्कगर्व (अहंकार) – कुटिलैः। मानवैः = मनुष्यैः, नरैः वा। मानवाः – मनुष्याः नराः वा। अस्पृश्याः इति – स्पर्शायोग्याः इति, स्प्रष्टुं न योग्याः इति। (एवंविधम्) चिरम् – चिरकालपर्यन्तं दीर्घकालं यावत् वा। धिक्कृताः – अपमानिताः, तिरस्कृताः वा। शश्वत् – सर्वदा, आरम्भकालादेव। निर्दलिताः – दमिताः। उपेक्षिततमाः – अवहेलिततमाः, नितराम् अवमानिताः वा। विद्यार्जने – ज्ञानप्राप्तिविषये। वञ्चिताः – अवरोधिताः, प्रतारिताः वा। ते अमी–पूर्वोक्ताः एते निर्दलितादयः। येन–जनविशेषेण (डॉ. भीमराव–अम्बेडकरेण) स्वतपसा – निजतपोबलेन, अनवरतप्रयासैः वा। समुद्धृताः परिरक्षिताः – संरक्षिताः। तस्मै – तादृशाय, तत्स्वरूपाय वा। भीमाय – डॉ0 भीमराव–अम्बेडकराय। नमः – नमस्कारः इति।

**भावार्थः** – हन्त ! सम्पूर्णभारतवर्षे निरर्थकधार्मिकाहंकारैः मानवैः मनुष्याः स्पर्शयोग्याः न सन्तीति वचनैः दीर्घकालं यावत् अपमानिताः अतिष्ठन्। ये निरन्तरं निर्दलिता उपेक्षिता विद्यार्जनवञ्चिताः आसन् तेषां कृते सम्मानप्रदानार्थं प्रयासः विहितः, एतादृशाय भीमराव–अम्बेडकराय नमः इति।

**व्याकरणम्** –

मिथ्याधर्ममताभिमानकृपणैः – मिथ्याधर्ममतस्य अभिमानमिति मिथ्याधर्ममताभिमानम्, तस्मिन् कृपणः इति मिथ्याधर्ममताभिमानकृपणः, तैः (ष.त.)। (स.त.)। उपेक्षिततमाः – उपेक्षित + तमप् (तम्) + जस्। विद्यार्जने – विद्यायाः अर्जनम् इति विद्यार्जनम्, तस्मिन् विद्यार्जने (ष.त.)। वञ्चिताः– वञ्च् + क्त (त) + जस्। अमी – अदस् + जस् (पुं.प्र.ब.)। स्वतपसा – स्वस्य तपः इति स्वतपः, तेन स्वतपसा (ष. त.)।

**अज्ञानोपहतात्मनां जडधियां व्यालुप्तसत्कर्मणाम्,**
**न ज्ञानेन विना कदाचन भवेज्ज्योतिर्मयं जीवनम्।**
**तद्विद्याऽभिमुखीकृता स्वजनता येन प्रबुद्धात्मना,**
**विद्याराधननैष्ठिकाय विदुषे भीमाय तस्मै नमः।। 4 ।।**

**पदच्छेदः** – अज्ञान–उपहत–आत्मनाम् जडधियाम् व्यालुप्तसत्कर्मणाम्, न ज्ञानेन विना कदाचन भवेत् ज्योतिर्मयं जीवनम्, तद्विद्याः अभिमुखीकृता स्वजनता येन प्रबुद्ध–आत्मना विद्या–आराधन–नैष्ठिकाय विदुषे भीमाय तस्मै नमः।

**अन्वयः** – अज्ञानोपहतात्मनाम् जडधियाम् व्यालुप्तसत्कर्मणाम् (च) जीवनम् ज्ञानेन विना न कदाचन (अपि) ज्योतिर्मयं भवेत् (इति) तद् येन प्रबुद्धात्मना स्वजनता विद्याभिमुखीकृता तस्मै विद्याराधननैष्ठिकाय विदुषे भीमाय नमः।

**प्रसङ्गः** – अस्मिन् पद्ये डॉ0 भीमराव–अम्बेडकरः उपेक्षितवर्गस्य जनानां मध्ये विद्यायाः प्रचारं–प्रसारं च कृतवान् इति वर्ण्यते।

**व्याख्या**– अज्ञानोपहतात्मनाम् – अविद्याग्रस्तचेतसाम्। जडधियाम् जडबुद्धीनाम्। व्यालुप्तसत्कर्मणाम् – प्रणष्टसत्कृत्यानाम् (जनानामिति शेषः)। जीवनम् – प्राणधारणम्। ज्ञानेन विना – विद्याम् अन्तरेण, ज्ञानस्य अभावे वा। कदाचन – कदाचिदपि। ज्योतिर्मयम् – प्रकाशमयम्

(ज्ञानप्रकाशितमिति भावः)। न भवेत् – न स्यात्। तद् – तर्हि। येन–जनविशेषेण (भीमरावेण)। स्वजनताः – निजजनाः (तथाकथितः अस्पृश्यसमाजः इति)। विद्याऽभिमुखीकृताः – ज्ञानप्राप्तिविषये प्रेरिताः। तस्मै–तादृशाय। विद्याराधननैष्ठिकाय – ज्ञानसमाराधानप्रतिज्ञाय। विदुषे–ज्ञानिने, विपश्चिते विज्ञाय वा भीमाय– डॉ0 भीमराव–अम्बेडकराय। नमः – नमस्कारः इति।

**भावार्थः –** येन भीमराव–अम्बेडकरेण अविद्याग्रस्तानां, जडमतीनां प्रणष्टसत्कर्मणां जनानां मध्ये विद्याध्ययनार्थं प्रेरितम्। एतादृशः विद्या–नैष्ठिकः विज्ञः प्रणम्यः इति।

**व्याकरणम् –** अज्ञानोपहतात्मनाम् – अज्ञानेन उपहत आत्मा यस्य सः अज्ञानोपहतात्मा, तेषाम् अज्ञानोपहतात्मनाम् (बहुव्रीहिः) कदाचन – किम् (क) दा + चन। जीवनम् – जीव् + ल्युट् (यु – अन)। स्वजनता – स्वस्य जनः स्वजनः, तस्य भावः, कर्म वा स्वजनता। विदुषे – विद् + मतुप् (मत्) (ङे.)।

**श्रीमन्वादिभिराद्यवागनुगतैः सौराज्यकार्योचितः,**
**पन्थाः प्राक्तनधर्मशास्त्रविधिवत् क्षुण्णः पुरा भारते।**
**कालेनोपहतः स येन सुधिया काले नवे संस्कृतः,**
**सश्रद्धं नवसंविधानऋषये भीमाय तस्मै नमः।। 5 ।।**

**पदच्छेदः –** श्रीमन्वादिभिः आद्यवाग् अनुगतैः सौराज्य–कार्य + उचितः, पन्थाः प्राक्तन– धर्मशास्त्रविधिवत् क्षुण्णः पुरा भारते, कालेन उपहतः सः येन सुधिया काले नवे संस्कृतः, सश्रद्धम्, नवसंविधानऋषये भीमाय तस्मै नमः।

**अन्वयः–** पुरा भारते आद्यवाग् अनुगतैः श्रीमन्वादिभिः क्षुण्णः, प्राक्तनधर्मशास्त्रविधिवत् सौराज्यकार्योचितः पन्थाः कालेन उपहृतः। येन सुधिया नवे काले सः (पन्थाः) संस्कृतः (इति) तस्मै नवसंविधान–ऋषये भीमाय सश्रद्धं नमः।

**प्रसङ्गः –** अस्मिन् पद्ये कविः डॉ. भीमराव–अम्बेड़करमहोदयः भारतदेशे नवीनं संविधानम् अरचयत् इति प्रतिपादयति।

**व्याख्या –** पुरा – प्राचीनकाले, पुरातनसमये। भारते – भारतवर्षे, भारतराष्ट्रे वा। आद्यवागनुगतैः – आदिवाणीम् अनुसरद्भिः प्रथमगिरमनुगच्छद्भिः। श्रीमन्वादिभिः श्रीमद्भिः मनुप्रभृतिभिः धर्माचार्यैः। क्षुण्णः – अभ्यस्तः। प्राक्तनधर्मशास्त्रविधिवत् – पूर्वतनस्मृतिग्रन्थानुरूपम्। सौराज्यकार्योचितः सुशासनकर्तव्ययोग्यः। पन्थाः – मार्गः, अध्वा वा। कालेन – समयेन, यथाकालम्, कालक्रमेण वा। उपहतः = निहतः, क्षीणः, खण्डितो वा। सः – सः मार्गः। येन सुधिया – येन सुबुद्धिना, सन्मतिना वा। नवे काले – नूतनसमये, आधुनिककाले वा। संस्कृतः संशोधितः, परिष्कृतः वा। तस्मै – तादृशाय। नवसंविधानऋषये – नवीनधर्मसिद्धान्तसंस्थापकाय, नवीनाचारद्रष्ट्रे। भीमाय – डॉ. भीमराव–अम्बेड़करमहोदयाय। सश्रद्धम् – सादरम्, श्रद्धापूर्वकं वा। नमः – नमस्कारः इति।

**भावार्थः –** प्राचीनकाले भारतदेशे संस्कृतवाणीम् आश्रित्य मनुसदृशैः धर्माचार्यैः निर्मितं धर्मशास्त्रं सम्यगधीत्य सुशासनकार्योचितः नवीनः मार्गः श्रीमता भीमराव–अम्बेडकरमहोदयेन आश्रितः। एतादृशनूतनसंविधाननिर्मात्रे श्रीमते भीमरावमहोदयाय नमस्कारः इति।

## व्याकरणम्

श्रीमन्वादिभिः – श्रीमनु–आदिभिः – यण्सन्धिः। आद्यवागनुगतैः – आद्यवाचम् अनुगतः इति

आद्यवागनुगतः, तैः आद्यवागनुगतैः। क्षुण्णः – क्षुद् + क्तः (त) + सु। कालेनोपहतः – कालेन + उपहतः (गुणसन्धिः)। सश्रद्धम् – श्रद्धया + सह इति सश्रद्धम्। नवसंविधानऋषये – नवसंविधानस्य ऋषिः इति नवसंविधानऋषिः तस्मै नवसंविधान–ऋषये।

**अध्यात्मप्रवणो नितान्तकरुणापूर्णोऽष्टमार्गात्मकः,**

**सद्धर्मः किल सम्प्रवर्तित इह श्रीबुद्धदेवेन यः।**

**कालेनाऽस्तमितोऽपि येन स पुनः सञ्जीवितो भारते,**

**भक्त्या धर्मधुरन्धराय कृतिने भीमाय तस्मै नमः।। 6।।**

**पदच्छेदः –** अध्यात्मप्रवणः नितान्तकरुणापूर्णः अष्टमार्गात्मकः सद्धर्मः किल सम्प्रवर्तितः इह श्रीबुद्धदेवेन यः, कालेन अस्तमितः अपि येन सः पुनः सञ्जीवितः भारते भक्त्या धर्मधुरन्धराय कृतिने भीमाय तस्मै नमः।।

**अन्वयः –** इह किल श्रीबुद्धदेवेन यः अध्यात्मप्रवणः, नितान्तकरुणापूर्णः, अष्टमार्गात्मकः (च) सद्धर्मः सम्प्रवर्तितः सः कालेन अस्तमितः अपि येन भारते पुनः सञ्जीवितः (इति) तस्मै धर्मधुरन्धराय कृतिने भीमाय भक्त्या नमः।

**प्रसङ्गः –** अस्मिन् पद्ये कविः कथयति यतः– डॉ. भीमराव–अम्बेड़करः सद्धर्मस्य प्रवर्तनं कृतवान् इति।

**व्याख्या –** इह – अत्र। किल – नूनम्। श्रीबुद्धदेवेन – महात्मना बुद्धेन। यः – अग्रे वर्ण्यमानः (सद्धर्मः), अध्यात्मप्रवणः – आत्मचिन्तनपरः। नितान्तकरुणापूर्णः – दयाभावपरिपूर्णः सुतरां कारुण्यभरितः। अष्टमार्गात्मकः – अष्टसिद्धान्तमयः। सद्धर्मः – उत्कृष्टधर्मः, श्रेष्ठधर्मः। किल – खलु, निश्चयेन। सम्प्रवर्तितः सम्प्रेरितः, प्रतिपादितः। कालेन – कालक्रमेण, समयपरिवर्तनेन। अस्तमितः – लुप्तोऽपि, अस्तं गतोऽपि। सः – सद्धर्मः। येन – डॉ. भीमराव–अम्बेडकरेण। भारते –भारतदेशे। पुनः – भूयः। सञ्जीवितः – सम्प्रवर्तितः, सम्प्राणितः। तस्मै – तादृशाय। धर्मधुरन्धराय – धर्मधौरेयाय, धर्मपालनमूर्धन्याय। कृतिने – पुण्यवते, पुण्यात्मने, भीमाय – डॉ. भीमराव–अम्बेडकराय। भक्त्या–भक्तिभावेन, आदरपूर्वकम्। नमः = नमस्कार इति।

**भावार्थः –** अत्र महात्मनः बुद्धस्य मार्गमाश्रित्य डॉ. भीमराव–अम्बेडकरः आत्मचिन्तनपरं कारुण्ययुक्तम्, अष्टसिद्धान्तमयं श्रेष्ठधर्मं प्रतिपादितवान्। कालक्रमेण लुप्तोऽपि यः सद्धर्मः (बौद्धधर्मः) तद्धर्मः पुनः भारतदेशे अनेन पुनः सम्प्राणितः। एतादृशगुणयुक्ताय धर्मधौरेयाय पुण्यात्मने भीमाय सादरं नमस्कारः इति।

**व्याकरणम् –** अध्यात्मप्रवणः – अध्यात्मे प्रवणः इति अध्यात्मप्रवणः (स.त.)। सद्धर्मः – सत् चासौ धर्मः इति सद्धर्मः (कर्मधा.)। सम्प्रवर्तित – सम् + प्र + वृत् + क्त + सु। सज्जीवितः सम् + जीव् + क्त + सु। धर्मधुरन्धराय – धर्मेषु धुरन्धरः इति धर्मधुरन्धरः तस्मै धर्मधुरन्धराय (स.तत्पु.)। कृतिने – कृतिन् + ङे.(ए) च.वि.ए.व.।

**अन्यायप्रतिरोधिने नयवते पाखण्डविध्वंसिने,**

**अत्याचारविमर्दिने बलवते निःशक्तसंरक्षिणे।**

**युक्तायुक्तविवेकिने मतिमते सद्धर्मसंस्कारिणे,**

**दीनानाथसुधारिणे कृतिमते भीमाय तस्मै नमः।। 7।।**

**पदच्छेदः –** अन्यायप्रतिरोधिने नयवते पाखण्डविध्वंसिने अत्याचारविमर्दिने बलवते निःशक्तसंरक्षिणे युक्तायुक्तविवेकिने मतिमते सद्धर्म–संस्कारिणे दीनानाथ–सुधारिणे कृतिमते भीमाय तस्मै नमः।

**अन्वयः –** अन्यायप्रतिरोधिने, नयवते, पाखण्डविध्वंसिने, अत्याचारविमर्दिने, बलवते, निःशक्तसंरक्षिणे, युक्तायुक्तविवेकिने, मतिमते, सद्धर्मसंस्कारिणे, दीन–अनाथ–सुधारिणे तस्मै कृतिमते भीमाय नमः।

**प्रसङ्गः –** अस्मिन् श्लोके डॉ0 भीमराव–अम्बेडकरस्य व्यक्तित्वे विद्यमानानां विशिष्टगुणानां वर्णनं विद्यते।

**व्याख्याः –** अन्यायप्रतिरोधिने – अनुचितकर्मविरोधिने, दुर्निर्णयविरोधिने। नयवते – नीतिशास्त्रनिपुणाय, नीतिमते। पाखण्डविध्वंसिने – आडम्बरविघातिने। अत्याचारविमर्दिने – क्रूरकृत्यविनाशिने, कदाचारविनाशकर्त्रे। बलवते – शक्तिमते, शक्तियुक्ताय। निःशक्तसंरक्षिणे – असमर्थजनपालकाय, सामर्थ्यशून्यजनसंधारकाय। युक्तायुक्तविवेकिने – उचितानुचितज्ञानसम्पन्नाय, सद्असद्विवेकयुक्ताय। मतिमते – सुधिये, बुद्धिमते। दीनानाथसुधारिणै – दैन्यग्रस्तजनपरिष्कारिणे, निर्धन अनाथजनानां सुधारकर्त्रे। तस्मै– तादृशाय। कृतिमते – कृतकृत्याय, क्रियासिद्धियुक्ताय, भीमाय – डॉ. भीमराव–अम्बेडकराय। नमः नमस्कारः इति।

भावार्थः – अनुचितकार्यविरोधिने नीतिमते आडम्बरविरोधिने क्रूरकृत्यविनाशिने शक्तियुक्ताय असमर्थजनपालकाय उचितानुचितज्ञानसम्पन्नाय बुद्धिमते श्रेष्ठधर्मसंस्कारिणे दीन–अनाथ–सुधारकर्त्रे बुद्धियुक्ताय श्रीमते डा. भीमराव–अम्बेडकराय नमः।

## व्याकरणम् –

अन्यायप्रतिरोधिने–अन्यायस्य प्रतिरोधी इति अन्यायप्रतिरोधी, तस्मै अन्यायप्रतिरोधिने। पाखण्डविध्वंसिने–पाखण्डस्यविध्वंसी इति पाखण्डविध्वंसी तस्मै – पाखण्डविध्वंसिने। मतिमते – मति + मतुप् (मत्) + ङे (च.ए.) सद्धर्मसंस्कारिणे – सद्धर्मस्य संस्कारी इति सद्धर्मसंस्कारी, तस्मै सद्धर्मसंस्कारिणे। कृतिमते–कृति + मतुप् (मत्) + ङे (ए) च.ए.व.।

**अनग्रजन्माऽपितु योऽग्र्यजन्मा,**

**निषिद्धधर्माऽपितु धर्म्यकर्मा।**

**अभीमधामाऽपितु भीमनामा,**

**समादरान्मे शतशः प्रणामाः।। 8 ।।**

**पदच्छेदः –** अनग्रजन्मा अपितु यः अग्र्यजन्मा, निषिद्धधर्मा अपितु धर्म्यकर्मा अभीमधामा अपितु भीमनामा समादरात् मे शतशः प्रणामाः।

**अन्वयः –** यः अनग्रन्मा अपितु अग्र्यजन्मा (यः) निषिद्धधर्मा अपितु धर्म्यकर्मा। (यः) अभीमधामा अपितु भीमनामा। समादरात् मे शतशः प्रणामाः।

**प्रसङ्गः –** अस्मिन् श्लोके कविः सादरं डॉ. भीमराव–अम्बेडकरं प्रणमति।

**व्याख्या** – यः व्यक्तिविशेषः (भीमरावः) अनग्रजन्मा अपि – उच्चकुले जन्म अलब्ध्वाऽपि। अग्र्यजन्मा –श्रेष्ठजन्मा, उत्तमजन्मवान्। यः व्यक्तिविशेषः, निषिद्धधर्मा अपि–अननुमतधर्माचरणः अपि, धर्माचरणे निवारितः अपि। धर्म्यकर्मा – धार्मिककृत्यनिर्वाहकः धर्मानुकूलकृत्यः अपि। अभीमधामा अपि – अभयङ्करतेजाः अपि, अभयप्रदप्रभावः अपि। भीमनामा – भीमनामकः भीमाभिधानः, समादरात्– श्रद्धावशात्, निष्ठापूर्वकम्। मे – मम। शतशः– शतसंख्याकाः अनेकशः। प्रणामाः – नमस्काराः, प्रणतयः इति।

**भावार्थः** – यः भीमरावः अनुच्चकुले जनिं लब्ध्वाऽपि श्रेष्ठः अभवत्। धर्माचरणाद् दूरीकृतोऽपि ध र्मानुकूलकार्यं सम्पादितवान्। अभयड्.करशरीरस्थोऽपि भीमनामधेयः यः तं ससम्मानं कविः नमस्करोतीति।

**व्याकरणम्** :– अनग्रजन्मा – न अग्रजन्मा इति अनग्रजन्मा (नञ्–समासः)। निषिद्धः धर्मः यस्य स निषिद्धधर्मा (बहुव्रीहिः)। मे – अस्मद् + ङस् (ष.ब.)। समादरात् – समादर + ङसि. (पं. ए.व.)।

## अभ्यासप्रश्नाः

### 1. अतिलघूत्तरात्मकाः प्रश्नाः

**निर्देशः – प्रत्येकस्य प्रश्नस्य एकपङ्क्तौ उत्तरं प्रदेयमिति।**

1. डॉ. भीमराव अम्बेडकरस्य जन्म कस्मिन् कुलेऽभवत् ?
2. अस्पृश्यकुलानां कृते डॉ. भीमरावः किं कृतवान् ?
3. जीवानां बलं जन्म च कस्य अधीनं भवति ?
4. लोके श्रेष्ठत्वं केन (माध्यमेन) प्राप्यते ?
5. अस्पृश्यभावनया कीदृशैः मानवैः मानवाः चिरं धिक्कृताः ?
6. जीवनं केन विना ज्योतिर्मयं न सम्भाव्यते ?
7. अष्टमार्गात्मकः सद्धर्मः केन सम्प्रवर्तितः ?
8. कः अन्यायप्रतिरोधी उच्यते ?

### 2. लघूत्तरात्मकाः प्रश्नाः

**निर्देशः – प्रत्येकस्य प्रश्नस्य पंक्तिचतुष्टयात्मकम् उत्तरं प्रदेयम् –**

1. पुरा अस्पृश्यजनानां कृते किं किं निषिद्धम् आसीत् ?
2. डॉ0 भीमराव–अम्बेडकरस्य जीवनं कस्य तत्त्वस्य निदर्शनं विद्यते ?
3. डॉ0 भीमरावेण स्वतपसा कीदृशाः जनाः समुद्धृताः ?
4. कीदृशानां जनानां जीवनं ज्योतिर्मयं न सम्भाव्यते ?
5. ज्ञानमुद्दिश्य डॉ. भीमरावेण किं किम् आचरितम् ?

6. पुरा भारतवर्षे कः पन्थाः कालेन उपहतः ? केन च पुनः संस्कृतः ?
7. कः सद्धर्मः श्रीबुद्धदेवेन सम्प्रवर्तितः ?
8. अष्टमार्गात्मकः सद्धर्मः कः इति लेखनीयम्।

### 3. निबन्धात्मकाः प्रश्नाः

### निर्देशः – प्रत्येकस्य प्रश्नस्य दशसु पङ्क्तिषु उत्तरं प्रदेयम् –

1. 'तथाऽपि उदग्रमहिमा प्राप्तः' इत्यस्य आशयं स्पष्टयत।
2. 'जीवानां बलजन्मदैवनियतम्' इति कथनस्य कोऽभिप्रायः ?
3. भीमाष्टकस्य लेखकस्य सङ्क्षिप्तः परिचयः प्रदेयः।
4. अस्पृश्यताविषये स्वकीयं मतं प्रकटयत।
5. नवसंविधान–ऋषिः कः किमर्थं च इति स्पष्टयत।
6. डॉ0 भीमराव–अम्बेडकरमहोदयस्य गुणविशेषाः वर्णनीयाः।
7. अनग्रजन्माऽपितु .............................. इत्यादिनः पद्यस्य भावः लेख्यः।
8. 'भीमाष्टकम्' इति पाठस्य सारांशः लेखनीयः।

### व्याकरणपल्लवनम् –

### सन्धिपरिचय :–

निषेधाकुले – निषेध + आकुले – दीर्घः (स्वरसन्धिः)।
मनागनुमतिः – मनाक् + अनुमतिः – जश्त्वम्, हल्सन्धिः।
तथाप्युदग्रमहिमा – तथापि + उदग्रमहिमा – यण्, स्वरसन्धिः।
मान्येऽवमान्ये – मान्ये + अवमान्ये – पूर्वरूपम्, स्वरसन्धिः।
उज्ज्वलम् – उत् + ज्वलम् – जश्त्वम्, श्चुत्वम्, हल्सन्धिः।
यस्योज्ज्वलम् – यस्य + उज्ज्वलम् – गुणः, स्वरसन्धिः।
नरोत्तमः – नर + उत्तमः – गुणः, स्वरसन्धिः।
देशेऽखिले – देशे + अखिले – पूर्वरूपम्, स्वरसन्धिः।
धिक्कृताश्चिरम् – धिक् + कृताः+ चिरम् – सत्वम्, श्चुत्वम्, विसर्गसन्धिः।
निर्दलिताः – निः+दलिताः – रुत्वम्, विसर्गसन्धिः।
शश्वन्निर्दलिताः – शश्वत् + निर्दलिताः – अनुनासिकपरसवर्णः, हल्सन्धिः।
तेऽमी – ते + अमी – पूर्वरूपम्, स्वरसन्धिः।
व्यालुप्तम् – वि + आलुप्तम् – यण्, स्वरसन्धिः।

ज्योतिर्मयम् – ज्योतिः + मयम् – रुत्वम्, विसर्गसन्धिः।

मन्वादिभिः – मनु + आदिभिः – यण्, स्वरसन्धिः।

आद्यवागनुगतैः – आद्यवाक् + अनुगतैः – जश्त्वम्, हल्सन्धिः।

योऽग्र्यजन्मा – यः + अग्रजन्मा – रुत्वम्, उत्वम्, पूर्वरूपम्, विसर्गसन्धिः।

समादरान्मे – समादरात् + मे – अनुनासिकपरसवर्णः, हल्सन्धिः।

**समासपरिचयः –**

अस्पृश्यकुले – अस्पृश्यं च तत् कुलम् इति तस्मिन् अस्पृश्यकुले (कर्मधारयः)। विपत्तिविकले – विपत्तिभिः विकले इति विपत्तिविकले (तृ. तत्पु.)।

नानानिषेधाकुले – नानानिषेधैः आकुलम् इति नानानिषेधाकुलम्, तस्मिन् (तृ.तत्पु.)।

विद्यामन्दिरम् – विद्यायाः मन्दिरम् इति विद्यामन्दिरम् (ष. तत्पु.)।

विद्यामन्दिरसम्प्रवेशनम् – विद्यामन्दिरे सम्प्रवेशनम् इति विद्यामन्दिरसम्प्रवेशनम् (स.तत्पु.)।

उदग्रमहिमा – उदग्रः च असौ महिमा इति उदग्रमहिमा (कर्मधारयः)।

बलजन्म – बलं च जन्म च इत्यनयोः समाहारद्वन्द्वः।

दैवनियतम् – दैवेन नियतम् इति दैवनियतम् (तृ.तत्पु.)।

निःसंशयम् – निर्गतः संशयः यस्माद् इति तत् (विशेषणपदं) बहुव्रीहिः

धीरोदात्तनरोत्तमाय – धीरोदात्तः च असौ नरोत्तमः इति तस्मै धीरोदात्तनरोत्तमाय (कर्मधारयः)।

मिथ्याधर्ममताभिमानकृपणैः – मिथ्याधर्ममतानाम् अभिमानेन कृपणः इति मिथ्याभिमानकृपणः तैः इति (तृ.तत्पु.)।

अस्पृश्याः – न स्पृश्याः इति – नञ् – तत्पुरुषः।

अज्ञानोपहतात्मनाम् – अज्ञानेन उपहतः आत्मा येषाम् इति अज्ञानोपहतात्मानः तेषाम् इति अज्ञानोपहतात्मनाम् (ब.व्री.)।

व्यालुप्तसत्कर्मणाम् – व्यालुप्तानि सत्कर्माणि यस्य इति व्यालुप्तसत्कर्मा, तेषाम् इति व्यालुप्तसत्कर्मणाम् (ब.व्री.)।

विद्यायाः आराधनम् इति विद्याराधनम् – षष्ठीतत्पुरुषः।

प्रबुद्धात्मना – प्रबुद्धः आत्मा यस्य इति प्रबुद्धात्मा, तेन इति प्रबुद्धात्मना (ब.व्री.)। विद्याराधन नैष्ठिकाय – विद्याराधनाय नैष्ठिकः इति विद्याराधननैष्ठिकः तस्मै आद्यवागनुगतैः – आद्या च असौ वाक् इति आद्यवाक् – कर्मधारयः। आद्यवाचम् अनुगतः इति आद्यवागनुगतः तैः इति आद्यवागनुगतैः (द्वि.त.)।

सश्रद्धम् – श्रद्धया सहितम् इति सश्रद्धम् (अव्ययीभावः)।

नवसंविधानऋषये – नवसंविधानस्य ऋषिः इति नवसंविधानऋषिः, तस्मै इति नवसंविधानऋषये (ष.तत्पु.)।

धर्मधुरन्धराय – धर्मे (धर्माचरणे) धुरन्धरः इति धर्मधुरन्धरः, तस्मै धर्मधुरन्धराय (स.तत्पु.)।

अन्यायप्रतिरोधिने – न न्यायः इति अन्यायः – नञ्तत्पुरुषः, अन्यायस्य प्रतिरोधिने इति षष्ठीतत्पुरुषः।

अग्रजन्मा – अग्रे जन्म यस्य सः इति अग्रजन्मा (ब.व्री.)।

अनग्रजन्मा – न अग्र्यजन्मा इति अनग्रजन्मा (नञ्–तत्पु.)।

निषिद्धधर्मा – निषिद्धः धर्मः यस्मै सः इति निषिद्धधर्मा (ब.व्री.)।

धर्म्यकर्मा – धर्म्याणि कर्माणि यस्य सः इति (ब.व्री.)।

अभीमधामा – न भीमं धाम यस्य सः इति (ब.व्री.)।

भीमनामा – भीमः इति नाम यस्य सः इति (ब.व्री.)।

**प्रकृतिप्रत्ययानां परिचयः –**

विरोधः – वि + रुध् (धातुः) + घञ् (प्रत्ययः) पुं.प्र.ए.व.।

प्रेरणा – प्र + ईर् (धातुः) + युच् (प्रत्ययः) स्त्री प्र.ए.व.।

अवमान्ये – अव + मन् (धातुः) + ण्यत् (प्रत्ययः) भावे नपुं. स.ए.व.।

निदर्शनम् – नि + दृश् (धातुः) + ल्युट् (प्रत्ययः) नपुं.प्र.ए.व.।

उज्ज्वलम् – उत् + ज्वल् (धातुः) + अच् (प्रत्ययः) विशेषणम्– नपुं.प्र.ए.व.।

दृढतरम् – दृढ (शब्दः) + तरप् (प्रत्ययः) नपुं.प्र.ए.व.।

निर्दलिताः – निर् + दल् (धातुः) + क्त (प्रत्ययः) पुं.प्र.ब.व.।

उपेक्षिततमाः– उप + ईक्ष् (धातुः) क्त (प्रत्ययः) + तमप् (प्रत्ययः) पुं.प्र.ब.व.।

वञ्चिताः – (वचि) वञ्च् (धातुः) + क्त (प्रत्ययः) पुं.प्र.ब.व.।

क्षुण्णः – क्षुद् (धातुः) + क्त (प्रत्ययः) पुं.प्र.ए.व.।

उपहतः – उप + हन् (धातुः) + क्त (प्रत्ययः) पुं.प्र.ए.व.।

संस्कृतः – सम् (सुट्) + कृ (धातुः) + क्त (प्रत्ययः) पुं.प्र.ए.व.।

भक्त्या – भज् (धातुः) + क्तिन् (प्रत्ययः) स्त्री.तृ.ए.व.।

सञ्जीवितः – सम् + जीव् (धातुः) + क्त (प्रत्ययः) पुं.प्र.ए.व.।

प्रणामाः – प्र + नम् (धातुः) + घञ् (प्रत्ययः) पुं.प्र.ब.व.।